## समासेऽनञ्पूर्वे क्त्वो ल्यप्। (३७/३३३२)

समासेऽनञ्पूर्वे क्त्वा इत्येतस्य[1] ल्यप् इत्ययमादेशो भवति। प्रकृत्य। प्रहृत्य। पार्श्वतःकृत्य। नानाकृत्य। द्विधाकृत्य। समासे इति किम्? कृत्वा। [2]हृत्वा। अनञ्पूर्वे इति किम्? अकृत्वा। अहृत्वा। परमकृत्वा। उत्तमकृत्वा।

अनञ् इति [3]नञा अन्यदनञ् नञ्सदृशमव्ययं परिगृह्यते। तेन नञ्[4] अनव्ययं चानञ् न भवति। स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल् ल्यबादेशो न भवति। अथवा समासे इति निर्धारणे सप्तमी। तेन क्त्वान्तः समास एव [5]परिगृह्यते। स च 'येन विधिस्तदन्तस्य' (व्या. प. ३) इत्यनेन तदन्तविधिना, न तु 'कृद्ग्रहणे गतिकारकपूर्वस्यापि' (व्या. प. १२६) इति। तथा चानञ्पूर्वे इत्युच्यते। गतिकारकपूर्वस्य एव तु ग्रहणे सति नञ्पूर्वस्य [6]प्रसङ्ग एव नास्ति, नञ् न गतिर्न कारकम् (म. भा. ३.२५६) इति। प्रधाय, प्रस्थाय इत्यादिषु हिप्रभृतीन् अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते एव इति ज्ञापितमेतत्॥

## क्त्वापि छन्दसि। (३८/३५६०)

समासे अनञ्पूर्वे क्त्वा[7] इत्येतस्य क्त्वा इत्ययमादेशो भवति, अपिशब्दाल् ल्यबपि भवति छन्दसि विषये। 'कृष्णं वासो यजमानं परिधापयित्वा' (काठ.सं. ११.१०)। 'प्रत्यञ्चमर्कं प्रत्यर्पयित्वा' (अ.वे. २.१२.५५)। ल्यबपि भवति। 'उद्धृत्य जुहोति' (काठ.सं. ६.८)। [8]वा च्छन्दसि इति नोक्तम्, सर्वोपाधिव्यभिचारार्थम्। तेनासमासे ल्यब् भवति। अर्च्य तान् देवान् गतः। छन्दोऽधिकारः 'आज्जसेरसुक्' (७.१.५०/३५७२) इति यावत्॥

## सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। (३९/३५६१)

छन्दसि विषये सुपां स्थाने सु लुक् पूर्वसवर्ण आ आत् शे या डा ड्या याच् आल् इत्येते आदेशाः भवन्ति। सु–'अनृक्षरा ऋजवः सन्तु [9]पन्थाः' (ऋ. १०.८५.२३)। पन्थानः इति प्राप्ते।

[८१८] सुपां [10]सुपो भवन्तीति वक्तव्यम्। (म.भा. ३.२५६)

'[11]धुरि दक्षिणायाः' (ऋ. १.१६४.९)। दक्षिणायाम् इति प्राप्ते।

[८१९] तिङां तिङो भवन्तीति वक्तव्यम्। (म. भा. ३.२५६)।

'चषालं ये अश्वयूपाय तक्षति' (ऋ. १.१६२.६)। तक्षन्ति इति प्राप्ते। लुक् – 'आर्द्रे चर्मन्' (तै. १.५.९.३)। 'रोहिते चर्मन्' (काठ. सं. २४.२)। चर्मणि इति प्राप्ते। [12]हविर्धाने यत् सुन्वन्ति

---

1. प्रत्ययस्य इत्यधिकम् ड. ह. ड. 2. हृत्वा नास्ति फ. 3. नञा नास्ति क, नञोऽन्यत्र ड. ई. 4. अव्ययं इत्यधिकम् क. 5. गृह्यते ड.इ. 6. प्राप्तिः क. 7. अकृष्णं ब. 8. वा च्छन्दसि – भवति नास्ति ब, वा च्छन्दसि नास्ति ह.ई. 9. ते इत्यधिकम् क. 10. स्थाने इत्यधिकम् क. 11. भुवि क. 12. हविर्धानाय इ.